# શ્રીવિઠ્ઠલેશાષ્ટકમ્

Shri Viththaleshashtakam

sanskritdocuments.org

May 13, 2018

# Shri Viththaleshashtakam

# શ્રીવિઠ્ઠલેશાષ્ટકમ્

## Sanskrit Document Information

Text title : viThThaleshAShTakam

File name : viThThaleshAShTakam.itx

Category : vishhnu, aShTaka, raghunAthajI

Location : doc_vishhnu

Author : raghunAthajI

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રીવિઠ્ઠલેશાષ્ટકમ્

રઘુનાથકૃતં
શ્રીગણેશાય નમઃ ।
કુરુસદસિ કૃતાભૂદ્દ્રૌપદીવસ્ત્રશેષા
સકલનૃપવરેન્દ્રા યત્ર વક્તું ન શક્તાઃ ।
હરિચરણરતાઙ્ગી યેન તત્રાત્મધીરા
સ ભવતુ મમ ભૂત્યૈ વિઠ્ઠલેશઃ સહાયઃ ॥ ૧॥

પ્રથમજનનપાપપ્રાપ્તસમ્પ્રેતદેહૌ
સમય ઇહ મમાસ્મિન્કૃષ્ણભક્ત્યા સમેતૌ ।
ગલિતપતિતવેષાવુધ્ધૃતૌ યેન સદ્યઃ
સ ભવતુ મમ ભૂત્યૈ વિઠ્ઠલેશઃ સહાયઃ ॥ ૨॥

કમલદલસુનેત્રેણૈવ ભૂતેશમાયા-
તતિભિરિવ હિ યેન ભ્રામિતઃ સર્વલોકઃ ।
અખિલજગતિ સર્વસ્વીયભક્તાઃ કૃતાર્થાઃ
સ ભવતુ મમ ભૂત્યૈ વિઠ્ઠલેશઃ સહાયઃ ॥ ૩॥

સકલયદુકુલેન્દ્રો યેન કંસો હતોઽભૂત્
જનનસમયપૂર્વં દેવકીશૂરયોશ્ચ ।
પરિહૃતમપિ દુઃખં યામિકા મોહિતાશ્ચ
સ ભવતુ મમ ભૂત્યૈ વિઠ્ઠલેશઃ સહાયઃ ॥ ૪॥

તપનદુહિતુરન્તઃ કાલિયો મારિતઃ સન્
અલિગણસુહિતેઽસ્મિંસ્તત્ક્ષણે યેન નૃત્યમ્ ।
કૃતમપિ ચ તદમ્ભો લમ્ભિતં નિર્વિષત્વં
સ ભવતુ મમ ભૂત્યૈ વિઠ્ઠલેશઃ સહાયઃ ॥ ૫॥

કપટકૃતશરીરા પૂતના પ્રાપિતાઽભ્રં
વ્રજપતિગૃહસુપ્તાવેકપાદેન યેન ।

શકટ અસુરવેષઃ પ્રેષિતઃ સ્થાનનાશં
સ ભવતુ મમ ભૂત્યૈ વિઠ્ઠલેશઃ સહાયઃ ॥ ૬॥

પદનતિયુતહસ્તા તોષિતા યેન કુન્તી
હ્યસુરકુલસમૂહા હિંસિતા વીર્યવન્તઃ ।
અખિલભુવનભારઃ પ્રેષિતઃ સંલઘુત્વં
સ ભવતુ મમ ભૂત્યૈ વિઠ્ઠલેશઃ સહાયઃ ॥ ૭॥

અખિલસુરકુલેન્દ્રસ્યૈવ યેનાભિમાનો
ગિરિવરધરણેન ક્ષીણતાં પ્રાપિતશ્ચ ।
જલધરભવધારાઃ સંહૃતા ગ્રાવયુક્તાઃ
સ ભવતુ મમ ભૂત્યૈ વિઠ્ઠલેશઃ સહાયઃ ॥ ૮॥

વિટ્ઠલેશાષ્ટકમિદં પ્રાતરુત્થાય યઃ પઠેત્ ।
ભક્ત્યા નત્વા ચ સુમનાઃ સ યાતિ પરમાં ગતિમ્ ॥ ૯॥

ઇતિ રઘુનાથકૃતં શ્રીવિઠ્ઠલેશાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Viththaleshashtakam*

pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*